# .. shrii mahaashaastranugraha kavachastotraM ..

## ॥ श्री महाशास्त्रनुग्रह कवचस्तोत्रं ॥

श्रीदेव्युवाच-
भगवन् देवदेवेश सर्वज्ञ त्रिपुरान्तक
प्राप्ते कलियुगे घोरे महाभूतैः समावृते ॥ १
महाव्याधिमहाव्याळघोरराजैः समावृते
दुःस्वर्प्नशोकसन्तापैः दुर्विनीतैः समावृते ॥ २
स्वधर्मविरते मार्गे प्रवृत्ते हृदि सर्वदा
तेषां सिद्धिञ्च मुक्तिञ्चत्वं मे ब्रूहिवृषद्ध्वज ॥ ३
ईश्वर उवाच-
शृणु देवि महाभागे सर्वकल्याणकारणे ।
महाशास्तुश्च देवेशि कवचं पुण्यवर्धनम् ॥ ४
अग्निस्तम्भ जलस्तंभ सेनास्तंभ विधायकम् ।
महाभूतप्रशमनं महाव्याधि निवारणम् ॥ ५
महाज्ञानप्रदं पुण्यं विशेषात् कलितापहम् ।
सर्वरक्षोत्तमं आयुरारोग्यवर्धनम् ॥ ६
किमतो बहुनोक्तेन यं यं कामयते द्विजः ।
तंतमाप्नोत्यसन्देहो महाशास्तुः प्रसादनात् ॥ ७
कवचस्य ऋषिर्ब्रह्मा गायत्रीःछन्द उच्यते ।
देवता श्रीमहाशास्ता देवो हरिहरात्मजः ॥ ८
षडङ्गमाचरेद्भक्त्या मात्रया जातियुक्तया ।
ध्यानमस्य प्रवक्ष्यामि शृणुष्वावहिता प्रिये ॥ ९
अस्य श्री महाशास्तुः कवचमन्त्रस्य । ब्रह्मा ऋषिः ।
गायत्रीः छन्दः । महाशास्ता देवता । ह्रां बीजम् ।
ह्रीं शक्तिः । ह्रूं कीलकम् ।
श्री महाशास्तुः प्रसाद सिद्ध्यर्थे जपे विनियोगः ॥
ह्रां इत्यादि षडङ्गन्यासः ॥

ध्यानम् ॥

तेजोमण्डल मध्यगं त्रिनयनं दिव्याम्बरालङ्कृतं
देवं पुष्पशरेषु कार्मुकलसन्माणिक्यपात्राभयम् ।
बिभ्राणं करपङ्कजैः मदगज स्कन्धाधिरूढं विभुं
शास्तारं शरणं व्रजामि सततं त्रैलोक्य संमोहनम् ॥
लं इत्यादि पञ्चोपचार पूजा ॥

महाशास्ता शिरः पातु फालं हरिहरात्मजः ।
कामरूपी दृशं पातु सर्वज्ञो मे श्रुती सदा ॥ १
घ्राणं पातु कृपाध्यक्षो मुखं गौरीप्रियः सदा ।
वेदाध्यायी च मे जिह्वां पातु मे चिबुकं गुरुः ॥ २
कण्ठं पातु विशुद्धात्मा स्कन्धौ पातु सुरार्चितः ।
बाहु पातु विरूपाक्षः करौ तु कमलाप्रियः ॥ ३
भूताधिपो मे हृदयं मध्यं पातु महाबलः ।
नाभिं पातु महावीरः कमलाक्षोऽवतात् कटीम् ॥ ४
सनीपं पातु विश्वेशो गुह्यं गुह्यार्थवित्सदा ।
ऊरु पातु गजारूढो वज्रधारी च जानुनी ॥ ५
जङ्घे पाशाङ्कुशधरः पादौ पातु महामतिः ।
सर्वाङ्गं पातु मे नित्यं महामायाविशारदः ॥ ६
इतीदं कवचं पुण्यं सर्वाघौघनिकृन्तनम् ।
महाव्याधिप्रशमनं महापातक नाशनम् ॥ ७
ज्ञानवैराग्यदं दिव्यमणिमादिविभूषितम् ।
आयुरारोग्यजननं महावश्यकरं परम् ॥ ८
यं यं कामयते कामं तं तमाप्नोत्यसंशयः ।
त्रिसन्ध्यं यः पठेद्विद्वान् स याति परमां गतिम् ॥
इति श्रीगुह्यरत्न चिन्तामणौ श्रीमहाशास्त्रनुग्रहकवचं समाप्तम् ॥

Encoded and proofread by Antaratma antaratma at Safe-mail.net

---

Please send corrections to sanskrit@cheerful.com
Last updated April 22, 2008